# Tasmai Shri Gurave Namah

# તસ્મૈ શ્રી ગુરવે નમઃ

## Document Information

Text title : Tasmai Shri Gurave Namah

File name : tasmaishrIguravenamaH.itx

Category : misc, sanskritgeet, gurudev

Location : doc_z_misc_general

Author : vijayan vi. paTTAmbI

Acknowledge-Permission: Vijayan V. Pattambi

Latest update : August 11, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

August 12, 2024

*sanskritdocuments.org*

# Tasmai Shri Gurave Namah

## તસ્મૈ શ્રી ગુરવે નમઃ

ગુરુઃ બ્રહ્મેતિ સઙ્કલ્પો ભારતેષુ પ્રવર્ધતે ।
પુરુષસ્યાસ્ય સંસૃષ્ટૌ ગુરુરેવ હિ શક્તિમાન્ ॥

અધ્યેતા ધ્યાનશીલશ્ચ પરિષ્કર્તા તથા પુનઃ ।
કથાપ્રાણસમત્વાચ્ચ સો.અધ્યાપક ઇહોચ્યતે ॥

હિતાનુભવદાતા સ છાત્રેભ્યો માર્ગદર્શકઃ ।
દોષાણાં પરિહર્તા ચ સમદર્શી સત્યવાગપિ ॥

મનસા કર્મણા વાચા  છાત્રાણામુન્નતિં બહુ ।
સતતં કાઙ્ક્ષતે યોગી નિસ્પૃહઃ સત્યપાલકઃ ॥

આચાર્યો ભાવનાયુક્તઃ કલાકારશ્ચ સાત્વિકઃ ।
આશયગ્રહણે દક્ષો વાગ્મી ચ ક્ષમાયુતઃ ॥

હારકઃ છાત્રચિત્તાનાં વર્ધકો મૂલ્યસંસ્કૃતેઃ ।
ચોદકઃ સાધુવૃત્તીનાં નાશકો દુષ્ટકર્મણઃ ॥

પાઠ્યાંશાન્ સમ્યગાસૂત્ર્ય યથાકાલં સવિસ્તરં ।
છાત્રસ્તરાનુસારઞ્ચ પાઠ્યતે તેન ધીમતા ॥

પઠનાનુભવાંસ્તૂર્ણં મધુરૈરનુભવૈઃ સમં ।
સમાયોજ્ય યથાકાલં સન્દદાતિ સ પણ્ડિતઃ ॥

કાલિકાસુ ચ વૃત્તિષુ યથાશક્તિ યથોચિતં ।
છાત્રશક્તિં સમાયોજ્ય લોકાનુદ્ધરતે ગુરુઃ ॥

છાત્રાણાં પ્રિયમિત્રાણાં ચિત્તપદ્મેષુ સંશ્રયન્ ।
કલ્પાન્તં જીવતિ પ્રાજ્ઞઃ પિતૃકલ્પો નરાગ્રણીઃ ॥

કિં કર્મ કિમકર્મેતિ સાધુબોધપ્રદાયિને ।
ઉપદેશકવર્યાય તસ્મૈ શ્રી ગુરવે નમઃ ॥

— વિજયન્ વિ. પટ્ટામ્બિ

*Tasmai Shri Gurave Namah*

pdf was typeset on August 12, 2024

Please send corrections to *sanskrit@cheerful.com*